
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

के॰उ॰

॥श्रीवरदमूर्तये नमः॥ तुंदिलमिंदुकलाधरमघरीकृतविनिघ्नसंघातं॥ ढुंढि ढौकितकामं का
मरिपोरर्भकं भजत॥१॥ दिवाकराद्दैवविदां वरिष्ठात् यो विश्वनाथोजनि नागरेंद्ररूपः॥ स केशवस्या
व्दफलस्फुटीकां करोति सोदाहरणां प्रसन्नां॥२॥ श्रीकेशवदैवज्ञः निर्विघ्नग्रंथसमाप्त्यर्थं तत्र च
पार्थं च गणेशनमस्कृत्य चिकीर्षितं प्रतिजानीते॥ यतस्ताजिकोक्तफलं हायनोत्थं क्रमोक्तोक्तमन्यै
र्यतो दुर्गमं तत्॥ क्रमाद्वच्मि तत् पद्धतिं प्रस्फुटोक्त्या गणेशं नमस्कृत्य बालावबोधां॥१॥ अहं केशवा
वरस्तत् पद्धतिं तस्य वर्षफलस्य पद्धतिं मार्गं क्रमादनुक्रमेण वच्मि कथयामि॥ किं कृत्वा॥ गणेशं न
मस्कृत्य॥ यतः अन्यैराचार्यैः ताजिकोक्तं ताजिकशास्त्रोक्तं हायनोत्थं वर्षजातं फलं क्रमान्नोक्तं॥ कुतः
यतो दुर्गमं सुगमरीत्या तु अनाकं अतः अहं वक्ष्ये॥ कया प्रस्फुटोक्त्या॥ किं विशिष्टां पद्धतिं॥ बाला
वबोधां॥ बालानामप्यवबोधो ज्ञानं यस्यां सा तथा गतिः सुगमामित्यर्थः॥१॥ अथ वर्षफलज्ञानार्थं

राम

के॰ उ॰

किं कार्यमित्याह ॥ १ ॥ जन्मखगोदयान्प्रतिसमं जन्मार्कतुल्यो रविर्यत्रान्यब्दमुखं भवेद्गतसमाः
शैलाभ्रदिग्घ्ना १०७ हताः ॥ खाभ्रेभै ८०० र्जनिवासरादिसहिता रलष्टानगै ७ स्तद्दिने ब्दादिः सावयवो स्फु
टोत्र जनिजो मासः कुचिहूनयुक् ॥ २ ॥ यत्रान्हि यद्दिने जन्मार्कतुल्यः जन्मकालीनस्पष्टार्कतुल्यो रविः स
यो भवति तद्दिने अब्दस्य मुखं अब्दस्य वर्षस्य मुखं आदिः भवेत् ॥ एवं प्रतिसमं प्रतिवर्षं जन्मखगोदयान्
जन्मकालीनग्रहोदयान् सूर्यादयो ग्रहाः उदयो लग्नं तान् ज्ञात्वा विज्ञाय तद्दानयनप्रकारमाह ॥ गते
ति ॥ गतसमाः गतवर्षाणि जन्मकालीनशाको वर्त्तमानशाकाद्विशोध्य शेषं जन्मकालादारभ्य इष्टव
र्षपर्यंतं गतसमाः भवंति ताः शैलाभ्रदिग्घ्ना १०७ सप्ताधिकसहस्रेण घ्ना गुणिताः ॥ ततः खाभ्रेभैः ८००
अष्टशतैः ८०० हृताः भक्ताः फलं दिनानि शेषं षष्ठिगुणं हरभक्ते लब्धं मक्षराणि ॥ एवं फलं दिनघटीपल
घंयात्मं ॥ जनिवासरादिसहिता इति ॥ जन्मसमये यो वासरः जन्मघटीपलादिः पूर्वफले यथानुक्रमं संयो

गम

२

ज्यं ॥ तद्यथा ॥ पूर्वदिनादियल्लब्धंतद्दिनेजन्मवासरेयोज्यः ॥ घटिकायांउदयाज्जन्मसमयपर्य्यंतंघ
टिकायोज्याः ॥ रात्रौजन्मनिरात्रिगतघटीषुदिनमानंसंयोज्यं ॥ एवंउदयाद्गतघटिकायांयोज्याः पलेषु
पलानि ततः पलानांषष्ट्याहृतेलब्धंघटीषुयोज्यं ॥ पश्चान्नगैः ७ सप्तभिस्तष्टाः सावयवोघटीपलाद्य
वयवसहितेतद्वारेअब्दादिर्वर्षादिस्यात् ॥ अत्रजन्मोमासः स्फुटः स्फुटोज्ञेयः ॥ यस्मिन्मासेज
न्मस्तस्मिन्मासेवर्षप्रवेशोज्ञेयइत्यर्थः ॥ केचित्तस्मिंश्चिस्ययैलेभूनयुक्ते ॥ ऊनश्चयुक्तचऊनयुजौ
तयोः समाहारः ऊनयुक्भूनयुक्ते ॥ एकरहितस्तेयुक्तोवाकार्यः ॥ अयमर्थः ॥ यदाजन्मार्कतुल्योरवि
र्जन्ममासेनायातिपूर्वापरेमासेआयातितदाएकरहितएकयुक्तोवामासइत्यर्थसिद्धं ॥ उदाहरणं ॥ संव
वत् १६३६ शाके १५०१ समये आश्विनशुद्ध ९ शनौघटिकाः १४ पलानि ३४ मूलनक्षत्रघटी ४१ पल ५० शो
भनयोगघटी ३४ पल ९ दिनमानं २९ पल १२ तत्रसूर्योदयात्गतघटीषु ४ पल ६ कस्यचिज्जन्मस्ये

२

को॰उ॰

स्फुः सूर्यः ५।२४।४२।१२ लग्नं ६।१५।२६।४८ अक्षभा ६ चरखंडानि ६०।४८।२० अथ वर्षप्र
वेशः साध्यते ॥ जन्मकालीनः शाकः १५०१ वर्तमानशाकात् १५३२ शोधितः शेषं गताब्दाः ३१ शे
ला ध्रुव दि १०७ घ्रा ३१२१७ स्वाभ्रे मे ८०० हृताः लब्धं दिनादि ८।१।१२।६।३० जन्मवासरादि ०।४
युतं ३९।५।२२।३० समस्तेष्ट जाते सावयवं वा लब्धा दि ४।५।२२।३० एतस्मिन् सावयवे जातो व
र्षप्रवेशः ॥ अथ एकवर्षादिप्रवेशादग्रिमवर्षप्रवेशज्ञानार्थमुपायः ॥ ध्रुवा १ बाणचंद्रैः १५
कुरामैः ३१ खरामैः ३० युतं पूर्ववर्षाद्यवासराद्यं ॥ भवेदग्रिमो वर्षवेशस्तदानीं तिथिर्योजिता
शांकेर्ज्ञायते च ॥ पूर्ववर्षे यद्धोरादिकमागतं तस्मिन्वारादिके अयं क्षेपकः १।१५।३१।३० योजि
तः स अग्रिमो वर्षप्रवेशसमये वारादिर्भवति ॥ एवं मासप्रवेशो दिनप्रवेशश्च ज्ञेयम् ॥ एवं वर्षमा
सप्रवेशतिथौ एकादश योज्याः अग्रिमवर्षमासदिनप्रवेशतिथिर्भवति ॥ एवं वर्षादौ वारा

२

रिकं ज्ञात्वा तिथिस्तत्प्रश्नमाह ॥ रुद्रघ्नेनसमाः स्वखवाद्विकुलवाढ्याजन्मतिथ्यन्विताखतष्टाः
खवाग्निभि ३० रब्दवक्त्रजतिथिः स्याद्भूनयुक्ताक्वचित् ॥ वर्षादौस्फुटखेचरास्तनुमुखाभावाश्च
जन्मोत्थवद्धाता वै सुतजन्मलग्नभमिनैरस्तष्टं भवेद्दिथिल ॥ २ ॥ रुद्राएकादश ११ तैर्गुणिताइत
समाः गतवर्षाणिताः पृथक्खखवाद्विकुलवाढ्याः खक्रोयेनसेसत्यधिकत्वातभागेनआढ्योः
मुक्ताः कार्याः जन्मतिथ्यन्विताः जन्मकालेयोतिथिः शुक्लप्रतिपदमारभ्य भवतितयाअन्विता
मुक्ताः ततस्ताः तिथयः खाग्निभिः त्रिंशतानाताष्टाः शेषमब्दवक्त्रजतिथिः ॥ अब्दस्यमुखंवक्त्रंआदि
रितियावत् ॥ अब्दयाता तिथिः स्यात्वर्षप्रवेशतिथिरित्यर्थः ॥ साक्वचित् भूनयुक्ता कार्या ॥ एतदुक्तं
भवति वर्षप्रवेशवारे लेवानिर्णयः ॥ यस्तस्मिन् पूर्वानीतवासरे सा तिथिर्नायाति पूर्वेपरेवासरे आया
तिनदैकेनोना मुक्तावाकार्या ॥ एवमत्रवर्षप्रवेशमासपक्षतिथिवासरसमयान् ज्ञात्वा तत्कार्यमित्य

२

नआर॥ वर्षा[illegible] ॥ अथ वर्षादौ स्फुटखेचराः स्पष्टाः ग्रहाः यस्मात् कर्त्तव्या गोचराः तस्मात्साध्याः
तज्जन्मोत्पत्तजन्मकालेपइतिरीसौ द्वादशभावाः ससंधयः कार्याः ॥ याता वर्षाः तद्वर्षैः युतं जन्मलग्नं भं
जन्मलग्नराशिः इनैः द्वादशाभिस्तष्टं शेषं राशिस्थाने स्थितं भवेत् ॥ इत्थिहा मुथहा मुथा इति पर्यायः
अस्याः मुथागतिः पंचकलाः ५ प्रतिमासे अंशद्वयं त्रिंशत्कलाः २।३० एवं प्रतिवर्षे एकोराशिः १ यस्य व
र्षप्रवेशः क्रियते तस्य यस्मिन्नब्दे जन्म तदब्दीय देशांतरपलभाचरखंडकोदयाग्रह्याः उदाहरणं इ
तसमाः ३१ रूढ ११ ग्रा: ३४ । एथकूरचरवाद्विकुलवाढयाः ३४३ जन्मतिथ्यान्विताः ३४९ खाग्निभिः ३० त
ष्टा जाता कृष्णपक्ष चतुर्थी २ वर्षप्रवेशतिथिः ॥ जन्मलग्नं ६।१६।२६।४८ याताब्दैः ३१ युतं ३७।१६।२६।४८॥
इनैः १२ स्तष्टं जाता स्पष्टा मुथा १।१६।२६।४८ संवत् १६६७ शाके १५३२ आश्वीन कृष्ण ५ बुधे घटि ०
घ ५० अत्रोदयात् गतघटी ५।२२।३० एतस्मिन्नुसावयवे दिने जातो वर्षः ३२ प्रवेशः तात्कालिकाः स्प

४

र्यादयः स्वष्ठाः एतेलंकोदयाविघटिकाः पलात्मिकाः स्युः २७८।।२९९।।३२३ ऐतेउत्क्रमस्थाः विपरीताः कीटादित्रयाएणराशीनांभवंति ॥ ऐतेक्रमोत्क्रमस्थे स्वरदलैः स्वदेशीयचररखंडकैः हीनान्विताः कार्याः क्रमस्थाः चय क्रमस्थेः चररखंडकैः युताः कार्याः मेषमारभ्यषण्णाराशीनां उदयाः स्युः ॥ दूमेउत्क्रमस्थाः तुलातः षडुदयाः स्युः तथाहतेजाताः स्वोदयाः २१८।।२५१।।३०२ ३४७।।३७१।।३४८ अयनांशाः १८।।१८ पूर्वनतं ९।।१२ तत्कालिनग्रहाः ॥ तन्वादिद्वादशभावाः ससंधयः ॥ स्पष्टलग्नदशमभावे २ ११ सुखे ४ १० संकटकालो ५ ९

सू	चं	मं	बु	गु	शु	श	रा	के	संथा
५ २४ २२ १२	७ ३५ २२	० ३ २६	६	३ ५ ०	३ २४ २२	९ २८ २९ २१	१९ २९ २५	९ १९ २५	१९ २९ २८



४

सुस्ताद्ययो ११ ८ वैराष्टां त्रि रवुगान्पराई रवण दृष्ट्या भ्राई दन्तोधिका ॥ संख्याव स्फ

लमुग्रह क्रूरवलरवगे सह स्फुभे व्यत्यये हैं च ॥ प्राल्ल्युगके १२ भागविवरे चास्ताव लोन

स्या स्फलं ॥ ४ अ

थ दृष्टि साधनमा

स्ते हेति ॥ चिभवे

तती यैकादशे ॥ ११


स्ते ला स्ते फलं च

रणदृष्टिः ॥ अंबुरव

चतुर्थदशमे ४ १०

अथतन्वादिद्वादशभावानां चक्रं लिख्यते ७

त०	ध०	ध०	सं०	सु०	सं०	सु	सं०	सु	सं०	रि	स
६ २७ ३९		२४ २६ ५२		८ २५ २२ ४२		६ २६ २८ ७		० २५ २२ ४८		११ २४ २६ ५९	
जा	सं०	म	सं०	ध	सं०	क	सं०	आ	सं०	व्य	सं०
० २७ १ ९		१ २४ २६ ५८		२ २५ २२ ४९		३ २६ २८ ३१		४ २५ २२ ४८		५ २४ २६ ५९	



५

स्त्र कट कादिचरणदृष्टिः कोणेनवमपंचमे ९ ५ सुखासुखकरीत्रिचरणदृष्टिः अ
स्ताद्ययोः सप्तमप्रथमयोर्वैरावैरकरी सप्तमे पितथा दृष्टिः अग्निचयाच्चरणदृष्ट्या
दृष्टिनिष्फला द्रष्टावर्जित हस्य कस्य चोपेरा द्विद्वयेरा द्विदशके च पाद दृष्टिः एवं तृती
येकादशस्थाने चरणदृष्टिः एवं द्रष्टावर्जित हच्चय कस्यराशि त्रये चोपेरा शिनवके च
चतुर्थदशके स्थाने च ४ १० अर्द्धमिता दृष्टिः द्रष्टावर्जित हच्चय कस्य चोपे चतुर्थाष्टसमि
ते पंचम नवमस्थाने पाद त्रयमिता दृष्टिः द्रष्टावर्जित हच्चय कस्य चोपषड्रा त्रिमिते शून्य
मिते च सप्तम प्रथमस्थाने संपूर्णा चतुर्थ चरण दृष्टिः मुख्येत्नुपातः त्रिंशांश्चैः गतभोग्यां
कांतरं लभ्यते तदा द्रष्टावर्जित हस्य कस्य भोगैः किं लब्धं भोग्यांके अधिके गतांके युक्ते कार्य्यं
शर्य सांत हीन कार्य्यं सायतस्य स्पष्टा कला दृष्टि र्भवति द्रष्टावर्जित हस्य कस्य एकादशे अ

५

काः परार्द्धखगदृक् परराशिषट्स्थितग्रहदृष्टिः प्राग्भार्द्धदृक्ः पूर्वराशिषट्कस्थितग्र
हदृष्टेरधिका तत्र लग्नादिषड्भांतपूर्वार्द्धम् सप्तमादिद्वादशांतमपरार्द्धमिति फलसंख्याव
संख्ययातुल्यं चरणदृष्टौ चरणः अर्द्धदृष्टौ अर्द्धं पादोनदृष्टिपादोनं संपूर्णदृष्टौ संपूर्णफ
लमिति खलखगे पापग्रहे उग्रदृष्टिः शुभे शुभग्रहे सद्दृक् शुभग्रहदृष्टिः तदा संख्यावत
फलमिति व्यत्यये वैपरीत्ये शुभे पापदृक् तदा अर्द्धं फलं ज्ञेयं चीप्रात्सीप्रगतिग्रहात्ल
घुगे अल्पगते अर्कभागविवरे द्वादशभागमध्ये चेन्नत्सा दृष्टिः शास्त्राउत्तमा बलाबलं ब
लाधिक्ये पूर्णफलं मध्यबले मध्यमफलं बलाल्पत्वे अल्पबलं ज्ञेयं ४ अथ यलाणां दी
सिभागान्नोह तिस्रः कोष्ठनगांकद्वौ लनवचांकौ दीप्तिभागास्तु ते दृष्टं नो न्मितछत्रयरव
टकलवाः पृष्ठे यतो हि भवेत् नार्याज्ञार्किसितेंदुज्ञानरद्र्लान्ये रात्रिहर्ह विनालग्राहिविवि

10

६

गुर्वाथरसभूरङ्केषु दिग्दृष्टिविनात ॥ ५ ॥ अर्का सूर्यात्तिथ्यादयो दीप्तिभागाः स्युः ॥ तिथयः
पंचदश १५ सूर्यस्य ॥ अर्काः द्वादश १२ चंद्रस्य अष्टौ ८ भौमस्य ॥ नगाः सप्त ७ बुधस्य अंकाः
नव ९ गुरोः ॥ शैलाः सप्त ७ शुक्रस्य ॥ नव ९ शनेः दीप्तिभागाः स्युरित्यर्थः ॥ तैः दीप्तिभागैः दृष्टग्रहा
न्मितद्दस्य खेटकलवात् पृष्ठयतो दृक् भवेत् ॥ एतदुक्तं भवति ॥ पश्यति दृष्टात् स्याद्ग्रहस्ते
षां मितापरिमिताद्दस्य खेटकस्यावलोक्यमानस्य ग्रहस्य लवाः भागाः भवंति तदा संपू
र्णदृष्टिः ॥ दृष्टग्रहस्य भागेभ्यः दृष्टग्रहदीप्त्यंशादुत्ये द्रष्टृग्रहभागेः पृष्ठेन्यूनैः सार्द्धः अ
ल्पोवाधिकैः सद्भिः नैतादृक् दृष्टिः भवेत् ॥ इयं दीप्तिदृष्टिस्तु यवनाला मुपसन्नोऽसिया ॥ उदा
हरणम् ॥ गुरुदृष्टा ३।४।५।१० शुक्रो दृश्यः ॥ ७।५।४।३ ॥ ३ई दृष्टभागेभ्यः ४ द्रष्टृभा
गाः न्यूनाः संति दृष्टुर्दीप्त्यंशा ९ मध्येऽस्ति ॥ अतोऽनयोर्दृष्टिरस्तीति ज्ञातव्यं ॥ इत्यानि

६

ल॰के॰टी॰

॥ अब्जार्किसितेंदुज्ञाः चंद्रशुक्रबुधा नार्यः स्त्रीग्रहाः अन्ये रविभौमगुरवः पुरुष
ग्रहाः अत्र नपुंसकं न मतं ॥ अथ चत्वारि हर्षस्थानानि तत्र हर्षस्थानत्रयमाह रात्री
ति रात्रिहर्षिताः रात्र्यह्नर्षिताः ३ अयमर्थः स्त्रीग्रहाः रात्रौ पुंग्रहाः दिने आनंदिताः
लग्नात् त्रित्रिषु लग्नादारभ्य त्रिषु राशिषु लग्नाद्द्वितीयतृतीयराशिषु वर्तमानाः स्त्रीग्रहाः ह
र्षिताः ततस्त्रिषु राशिषु चतुर्थपंचमषष्ठस्थानेषु वर्तमानाः पुरुषग्रहाः हर्षिताः ततः
सप्ताष्टनवमस्थानेषु स्त्रीग्रहाः हर्षिताः पुनर्दशमैकादशद्वादशस्थानेषु पुरुषग्रहाः
हर्षिताः इति ॥ अथ इनात् सूर्यमारभ्य सूर्यादिग्रहाणां गोयोन्या हर्षस्थानानि भवंति
लग्नादिति संबंधः तद्यथा लग्नान्नवमस्थो रविर्हर्षितः अग्निस्तृतीयः तत्रस्थश्चंद्र
रस्ताः षष्ठे तत्रस्थो भौमः भूः लग्नमिति तत्रस्थो बुधः रुद्र एकादशात् तत्रस्थो गुरुः

७

इष्टः पंचत्रस्थो भृगुः रिःफद्वादशांतत्रस्थः शनिर्दर्शितो भवति अत्र हर्षस्था
नत्रयमुक्तं चतुर्थं हर्षस्थानं ग्रंथांतरात् ज्ञेयं यतः स्वगृहे सति अथवा स्वोच्चस
ति चतुर्थं हर्षस्थानं ज्ञेयं स्वगृहे युद्धलं नद्वा स्वोच्च उभयत्रापि पंच विंशोपका
बलं नतु द्विगुणं अत्र विंशति विंशोपकाः परमबलं तत्र चत्वारि हर्षस्थानानि
भूतिकारणानि चतुर्भिर्भक्तैर्लब्धाः पंच विंशोपकाः ५ एवं चत्वारि हर्षपदे प्रत्येकं पंच
विंशोपकाः कल्पितं स्यात् तद्यथा उदाहरणं द्विवाहर्षप्रवेशे अतः पुरुषग्रहाणां रवि
भौमगुरूणां प्रथमं हर्षपदं स्थानं तत्र बलं पंच विंशोपकाः तृतीये प्रथमद्वितीया
द्वादशस्थाः स्त्रीग्रहाः बुधशुक्रचंद्राः द्वादशद्वाये पुरुषग्रहो गुरुरवीति ष्टेतस्ते
षां हर्षपदं द्वितीयं मासं तत्रापि बलाः पंच विंशोपकाः अथ सूर्यादयो लग्नाद्योग्नी

७

13

र	चं	मं	बु	गु	शु	श
५	०	५	०	५	०	०
५	५	०	५	५	५	०
०	०	०	५	०	०	०
०	५	५	०	५	०	५
१०	१०	१०	१०	१५	५	५

र	चं	मं	बु	गु	शु	श
०	१	९	५	३	११	६
१०	३	२८	१५	५	२७	२०
६	८	३	११	९	५	०
१०	२	२८	१५	५	२७	२०

मेषादिद्वादशराशीनामधिपाः											
मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
मं	शु	बु	चं	र	बु	शु	मं	गु	श	श	गु

स्यादिस्थानेषु न संति बुधः लग्ने
स्ति अतः तत्तीयं लर्षपदं प्राप्तं ॥ अ
ना पि बलं पंचविंशोपकाः ॥ शनिभौमौ स्वगृहे तिष्ठतः तयोश्चतुर्थं लर्षपदं आगतं ॥ गुरु
चंद्रौ स्वोच्चे अतः बलं पंचविंशोपकाः ॥ एवं सर्वेषां लर्षस्थानानि तेषु प्रत्येकं बलानि त
दैस्थानि च लिख्यते ॥ ॥ अथ द्वादशवर्गे चक्रमाह ॥ रवेरोच्चा नि चरोदिंशो समु

८

दिता ये जातकेते वैरेरे सूर्यचन्द्रमसोर्विषमभे युग्मे चन्द्रार्कयोः भागी भूत्वखगा
त्रिभागकमुख्या नागात संख्या हतात्स्वगासाः स्युरिताः षड्गानन्दैनेन्दष्टो जातो यः स्व
भात् ६ स्वेदोच्चानि ग्रहोच्चानि चानिधाः राशेः स्वामिनः ये जातकज्ञानकृतात्स्व
स्मुरिताः उच्चास्तेषां च येः यदाहवराहः अजवृषमृगांगनाकुलीरा झषवणिजौ च
दिवाकरादितुंगाः उच्चभागाख्यात दशशिखिमनुयुक्तिथींद्रियांशैस्त्रिनवक
विंशतिभिर्नैरस्तनीचान्यात अथ भपाः भेशा भौमास्फुजिच्छशांकरविबुधशुक्रशि ति
सुतेज्यमंदाः किं जीवादिति ग्रहो लग्नं वा यद्द्रेष्काणो यद्द्रेष्काणे [illegible] स्वामी अथ होरा वृषभरा
शेगोवादौ पंचदशांशाम ध्येये सूर्यस्य ततः पंचदशांशाः चंद्रस्य समराशे गवादौ पंच
दशभागाः चंद्रस्य ततः पंचदशांशाः सूर्यस्येति होरा लेया अथात्र भागद्वादशां

८

ल·के·टी·

शावर्गनात् भागीभूतेति भागीभूतखगात् यल्लस्य राशयस्त्रिंशता गुण्याः अधःस्वभागयु
क्तास्ते भागाः स्युः एवं भागीकृतात् यल्लात् त्रिभागकमुखवर्गान्तसंख्यात् तान् त्रिभागकःमुखे
आद्यो ऽंकैः क्रमो द्वादशांशो ऽंत्ये एषां तेन वर्गा एते चतुर्थपंचमषष्ठसप्ताष्टमनवमदशमैकादश
द्वादशांशास्तेषां संख्यया गुणितात् तद्यथा लग्नांशाश्चेत्तदा त्रिंशाद्भागीभूतखगात् चतुर्थां
शाश्चेत्तदा चतुर्गुणादित्यादि एवमंशसंख्यागुणितात् यल्लात् खवाप्तासाः त्रिंशांशलब्धमिताः इता
गतास्तृतीयांशादयः स्युरित्यर्थः षडंशाः षडंशमारभ्य एकादशांशपर्यन्तं द्वैवशात् त्रिभिस्त
ष्टः अवशेषितः स्वभात्तवशात्शेः सकाशात् ज्ञेयमिति । तन्नुमेपात् ६ अथ अंशादष्वयाणां
विशेषमाह यातस्य नवांशहृतिद्युगैस्तष्टाकैः तस्य नवांशपास्तष्टावेदलवाः द्रेष्काणपतीनाल
ब्धानितांस्तेषां त्रियात् ।दकूतष्टेषुलवाः कुजार्किगुरुविद्युकास्फुजितोन्यथा ... सप्तांशवर्ग

९

दृष्टनिजज्ञोच्चेशुभोन्यः शुभः ८ याताः गताः पूर्वसाधिताः अंशकास्तेषां त्र्यंशकेपंचा
नाआहतेर्गुणनं कार्यं सा आहतिः द्विगुरु द्विगुणा अंगैः सप्तभिस्तष्टा अर्कैर्नः रविमारभ्य त्र्यं
शपाः त्र्यंशस्वामिनो भवति वेदलवाः पूर्वानीतश्चतुर्थांशास्ते हतेश्चतुर्भिस्तष्टाः ततस्त्रि
गुणिताः लब्धान्विताश्चतुर्भिर्युक्तलब्धेनान्विताः युक्ताः कार्याः ते चतुर्थांशस्वामि
नः क्रियात्मेषमारभ्यगणनीयाः इषुलवाः प्रागानीताः पंचमांशाः द्विनिघ्नाः इशाभिस्तष्टाः
शेषेकुजार्किगुरुविबुधशुक्रास्युः जिह्मेज्यकाव्याराः भौमशनिगुरुबुधशुक्रबुधगुरुसूर्य
भौमाः क्रमेणस्वामिनः स्युः दृष्टनिजसज्ञोच्चस्वगृहस्वमित्रस्वोच्चग्रहे सति तस्य ग्रहस्य द्वाद
शवर्गाः गृहहोरात्रतीयांशाचतुर्थांशापंचमांशाषष्ठांशासप्तमांशाअष्टमांशानवमांशादशमांशा
एकादशांशोद्वादशांशारूपः शुभः शुभफलप्रदः अन्यः नीचारिग्रहास्तंगता दयग्रहस्य द्वाद

ल॰के॰री॰

त्रावर्गः अशुभो विफलदः नद्युथा ग्रहाणं शुभवर्गपापवर्गपंक्तिद्वयांतरं तत्राधिकं शुभव
त्रोषेग्रहोबलीदृष्टः अशुभावत्रोषेनिर्बलः उदाहरणं अत्ररविः कन्यायामस्तिग्रहेत्रोबुधः
समरात्रेगृहितीयहोरायांतिष्ठति अतोग्रहेरविः रवि ५ २४ ४२ १२ भागीभूतः ७४ ४२ १२
त्रिगुणः ५२४ ६ ३६ त्रिंशाद्भक्तः फलगताः त्रिंशांशाः ७ यातत्र्यंशा ७ शराहतिः ८५ द्विगुण ८७
सप्ततष्टेशेषं ३ अंको ग्रयोगताः वर्त्तमानः बुधः स्वामी भागीभूत चतुर्गुणितेः ६९८ ४४ त्रिंश
द्भक्तः गताश्चतुर्थांशाः २३ हृतैः ४ नष्टाः लब्धं ५ त्रोषांशाः ३ गुणहताः ९ लब्धान्विताः १४ द्वाद
शभिस्तष्टः शेषं २ जातो वर्त्तमान चतुर्थांशो बुधः भागीभूतपंचघ्नः ७२ ३१ ० त्रिंशाद्भक्तः फ
लगतपंचांशाः २९ १६ ष्टतष्टः शेषं ६ नवगता विद्यमान सप्तमस्तदधिपो भौमः पंचमांशोंशाः षट्
घ्नः १०४८ १२ ३२ त्रिंशद्भक्तः लब्धं गताः षष्ठांशाः ३४ द्वादशस्तष्टाः शेषं १० दशागताः विद्यमान

षष्ठांशो नो मेषादि गणनया राशिः भागी भूतः सप्तघ्नः १२२२ ५५ २४ त्रिंशद्भक्ताः फलं गताः स
प्तमांशाः ४० हीनैस्तष्टाः शेषं ४ मेषादिद्वमाने सप्तमांशो राशिः भागी भूतोऽष्टघ्नः १३९७ ३७ १२ ६
त्रिंशद्भक्ताः लब्धगताः अष्टमांशाः ४६ हीनैस्तष्टाः शेषं १० मेषादिद्वमाने अष्टमांशो राशिः
भागी भूतो नवघ्नः १५७२ १९ ४८ त्रिंशद्भक्ताः फलगतनवमांशाः ५२ हीनैस्तष्टः ४ शेषादिद्व
मानेन नवमांशो राशिः भागी भूतो दशघ्नः १७४७ २७ त्रिंशद्भक्ताः फलगतदशमांशाः ५८ ही
नैस्तष्टाः शेषं १० विद्यमाने दशांशो राशिस्वामी राशिः भागी भूतो एकादशघ्नः १९२१ ४४ १२ त्रिं
शद्भक्ताः फलगतएकादशांशाः ६४ हीनैस्तष्टः शेषं विद्यमाने एकादशांशो राशिः भागी भूतो द्वाद
शघ्नः २०९६ २६ २४ त्रिंशद्भक्ताः फलगतद्वादशांशाः ६९ हीनैस्तष्टः शेषं ९ स्वराशेः सकाशादि
द्यमाने द्वादशांशो राशिः बुधः एवं ज्ञातः सर्वेषां द्वादशवर्गः लिख्यते इति द्वादशवर्गिकाः अथ

[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

सर्वेषांलहद्वांचाराख्यामिनआत षट्ईषद्धाईष्टु १
चारे ५षवा ५गुरुसितक्षाराकिंभागोः क्रियेष्टे १
गा६ष्टे ८षु ५गुण ३ वृषेसितबुधेज्याकीरला
स्त्रिचापाः हूंहुंगांईगईचारा ५ द्रु ७षट्ईसेम
गुज्याराक्रिलद्वांचाराकोकीटेस्थरूसितविद्धेलहव
गुभुं वोद्ध्रं ७गांईगईद्वेरो ७ध्रुपः ४ ८ सिंलेगे
७षु५नगां ७ग६षट्६गुरुसिलाक्रिद्वास्थजः
स्थुःस्त्रियांचैलोचूगो ७ १० च्चि४नग ७द्विका
२क्षभध्गुजेज्याराकेगानांधटे षण्णा६गा
ध्रुग ७ ७ बालव२ द्वानिबुधेंद्रेज्यास्फुजि६मा

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
गु६	शु८	बु६									
शु६	बु६	शु६									
बु८	गु८	गु६									
मं५	श५	मं७									
श५	मं२	श६									

गत्राय भुवांत्रो७ व्यो४ष्ट८न्नार५र्त्रे
द्रुति भिः कुजसितलज्ये नयोरंश्वि
रात्रा के९ चापेजीवसितलभौम
नांल त्रानयोर्के१२ष्वा५ब्धि४पंचा५
हाच ब्धि४भिर्नक्रेज्यासितार्कि
कमू स्टकूलवचयोद्ध्रु७ध्रु१९वेदा४
ध्ययः १०कुंभे शास्कुदीज्य भौमत्रानयोद्ध्रु७गा८द्विबाण९ ५भूमिपर्नीनिशुक्रगुरुस्तभौम
त्रानयोर्को१२ब्धा४ग्ने३गो२द्यत्राकेः ११ मेषस्थितस्यग्रहस्यप्रथमभागषड्कस्वामीगुरुः न

नो षष्ठि : शुक्रस्वामी ॥ ततो भागाष्टकस्वामी बुध : ॥ ततः पंचभागस्वामी भौमः ॥ ततो भागपंचकस्वामी
शनिरिति स्पष्टं चक्रे स्यष्टी कृतं एवमन्येपि बोद्धव्यं ॥ इति हद्दाध्यायः ॥ अथ ग्रहाणां मित्रामित्राण्या
ह ॥ सूर्या जीव कुजेंदवो रविकुजेज्या भास्करेज्येंदव शुक्रो ग्वर्कसुता : कुजार्कचांद्रि नोक्षगवर्केज्ञाः
स्युः क्रमात् राहुस्तास्फुजितः सितज्ञशनयो मित्राणि येन्ये रयः क्रूराः क्रूरखगरव भावमखिल
दाशेष्वयं ताजिकात् १२ सूर्यादि सूर्यमारभ्य ग्रहाणां मित्राणि स्युः गुरुभौमचंद्राः सूर्यस्य र
विभौमगुरवश्चंद्रस्य सूर्यगुरुचंद्राः भौमस्य शुक्रराहुशनयो बुधस्य भौमसूर्यचंद्राः गुरोः
बुधराहुशनयः शुक्रस्य राहुबुधशुक्राः शनेः शुक्रबुधशनयः राहो मित्राणि येऽन्ये मित्रभि
न्नास्ते ऽरयः वैरिणः तद्यथा बुधशुक्रशनिराहवो रविभौमगुरूणां रविचंद्रभौमगुरवो बुध
शुक्रशनिराहूणां शत्रवः ताजिकाचार्यमतेसमामनंति क्रूराः क्रूरखगरव भावं क्रूराः पापाः

ग्रहा	रा.	श.	शु.	गु.	बु.	भौ.	चं.	सू.
मित्राणि	शुबु श	शुबु रा:	बु रा श	सूमं चं	शु रा दा:	सू गु चं	सू मं गु	चं भौ गु
शत्रवः	सू चं मं गु	सू चं गु मं	सू चं गु मं	बु रा शु रा	गु चं मं सू	रा बु शु री	शु गु श रा	बु रा शु रा

क्रूराः अक्रूराः सौम्यास्तेषां स्वभावं राशेश्च अ
खिलं संज्ञायोगेषु संक्षेपतो मुख्यमुथशिलयोग
त्रयमाह एकर्क्षे धिकगोल्पगात् हि शालवोदीप्यं
शमध्ये क्रमान्न द्वाह्ये भवेदेष्यं कं मुथशिलं पूर्णं
वुतोचेत्समो भोग्यांशास्य चलात्स्य दीप्तिर्वृ
रेमं देयगेप्प्य प्यकं दीप्तं शावधि त्री श्रुगे युगं बलेस्यादीसराफ्रावय: १२ भोक्तांय फूलरः पुरातादि
तरेस्वास्यफलास्तेथं शां कस्यापि रुभवेद्धयोर्मुथशिलं केवलं उक्तोथले स्वर्क्षोच्चेशुभदाः स्वह दक्मुखे
मध्यास्वनीचारिभेनीचास्युः पृथगृक्षकेषु परिवगेषु न्योन्य दृष्ट्यापिते १३ एकर्क्षे एकराशिस्थितयो
र्ह्योर्मध्ये अधिकगरखगः अधिकगतिग्रहः अल्पगतग्रहात् हि शालवः भोगे रल्पैः दीप्यंशामध्ये त्री द्वय

ल·के·टी·

हस्यदीप्तंशावधिस्तदामुथशिलमभवज्ज्ञातं यादीप्त्यंशाबाह्येयत्तयोरंतरे दीप्तिभागाधिकेसतितदा
मुथशिलमेष्यकं अयमेकोयोगः दीप्तिभागाःप्रागुक्ताः तिथ्यर्केत्यादि तौएकराशिस्थौग्रहौसमौ
भागाधुवयवतुल्यौतदापूर्णंसपूर्णंमुथशिलंतत्कालएवज्ञातंज्ञेयं भिन्नराशावपियोगमाह भांसां
त्रांस्थेति भराशिः तस्ययोस्तयोअंतरः त्रिंशलमाख्यः तस्यविद्यमानेयश्चलः शीघ्रगतियस्तस्मा
त् स्वदीप्तिविवरे स्वदीप्त्यंशांतरसंदे अल्पगतोऽग्रेअधिकेइसराफाख्यः इसराफनामायोगःस्या
त् पुनःपूर्वंदीप्तिभागेः इत्थशाफलदःफलजनकः नस्फलंत्वशुभं नदितरेतस्मात्मुथशिलादितने
भिन्नाः येमुथशिलयोगाः तेत्थशाख्याफलाः स्वस्यआख्यानामतत्सहत्थशाफलाः एतदुक्तंभवति
गतेमुथशिलेशुभंजातं भविष्यन्मुथशिलेशुभंभावि पूर्णेशुभंवर्तनेतइति अथएकराशिस्थितयो
र्जातेमुथशिलेऽअस्यापितद्वाशिरिष्टत्वात् द्वयोःएकराशिस्थितेमुथशिलवतोःमुथशिलं

१२

भवति तदा कंबूलनामयोगउक्तः वर्त्तमानमुथशिलोदाहरणं शीघ्रगतिग्रहश्चंद्रः ४ २१ २२
अल्पगतेर्ग्रहाद्रवेः ४ २८ २९ एकराशौ ७ ६ पुनः दीप्तांशमध्ये स्थितेन मुथशिलयोगः सूर्यचं
द्रयोः एष्यमुथशिलोदाहरणं शीघ्रगतेर्ग्रहाद्बुधात् ४ ५ ९ अल्पगतिग्रहः सूर्यः ४ २८ ३९
दीप्तांशावधिकभागैरधिकः अतः सूर्यबुधयोरेष्यकः मुथशिलयोगः भिन्नराशौ एष्यमुथशि
लोदाहरणं अंतिमांशस्थितशीघ्रगः सूर्यात् ४ २६ ३९ तद्द्वितीयराशिस्थितमंदगति भौमः
५ २ १० स्वदीप्तिभागमध्येऽस्ति अतो एष्यकं मुथशिलं ईसराफयोगोदाहरणं सूर्यः ४ २८
३९ शुक्रः ४ २६ १५ अनयोर्मुथशिलमस्ति चंद्रः ४ २१ २२ स्याप्यस्ति अतः कंबूलयोगः इति
योगत्रयोदाहरणं अथैषां शुभाशुभमाह स्वर्क्षेति ते मुथशिलास्त्रयो योगाः स्वर्क्षोच्चचैव
राशौ स्वोच्चे ग्रहे सति शुभफलदाः स्नेहदृक्सुखे खलदृग्भ्राणनवांशे मध्यामध्यफलदाः स्व

१२

नीचादिमे स्वनीचेस्थचंद्राद्युग्रहे नीचाः अधमफलदाः स्वगेहेषु ग्रहेषु प्रथकृ२क्षगे। द्व
पि भिन्नराशिस्थितेष्वपि अन्योन्य दृष्ट्या परस्परदृष्ट्या नैकराशिस्थयरुयोरुक्तानुथ
शिलादयो योगाः भवंती त्यर्थः इतियोगत्रयसाधनं अथपंचवर्गबलमाह
त्रिंशांशे स्वसुहृद्दोग्रहे च तिथयः शांशोश्चसार्द्धनगाह दृद्धं च तथा दृक्काणके द्वादशांश
शाः षडंशगोशके उच्चेव्योमदृशाश्च नीचयुजिखंमध्येनुपाताद्दलं सुस्वव्यं पंचसु पंच
वर्गजयुतेः पादोत्रविंशोपकाः १४ स्वगृहस्थितग्रहे त्रिंशात् ३० सुहृदोसि त्रयरहेति
थयः १५ शत्रुगृहे सार्द्धसप्त ७ ३० दृद्दिमिति स्वहोरायामिति स्वहोरायां पंचदश
१५ मित्रहोरायां सार्द्धसप्त ७ ३० शत्रुहोरायां त्रिपादत्रयं २ ४५ बलंस्यात् एवं तेनोद्व

क्षाणे च्यं त्रांशा इति १० मित्रद्रेष्काणे पंच ५ शत्रुद्रेष्काणे सार्द्धद्वौ २ ३० अंशकेन वमांशो केषडंशा इति स्व
नवमांशके ५ पंच मित्रनवमांशो सार्द्धद्वौ २ ३० शत्रुनवांशे सपादएकः १ १५ उच्चे परमोच्चे व्याम द्वशो
२० विंशति २० परमनीचे रवं न्यूनं ० मध्ये उच्चे नीचान्तराले अनुपाताइ बलं साध्यं अनुपातमाह नीच
खेटांतर षड्भाद धिकं चेद्र्कतरस्य जेत् तल्लवा नवभिर्भक्तास्ता जिके तुंगजं बलं १५ नीचखेटांतरं पर
मनीचग्रहांतरं कार्यं षड्भाल षड्भान्नि तो धिकं तदा चक्रतः शोध्य शेषः तत्षड्भान्न्यूनं यथास्थित मेव
स्यर्थ सिद्धं तस्य लवाः अंशाः कार्याः पश्चान्नवभिर्भक्ताः लब्धं ताजिके तुंगजं उच्चबलं भवतीति ए
वमनया रीत्या मुख्य पंचवर्गजपते मुख्याः प्रधानाः पंचवर्गाः गृहोच्च हद्दा त्रेराशिक मुसल्लह संज्ञाः
ते भ्यो जातानानामंशानां युतिरैक्यं तस्याः पादः चतुर्थांशः अत्र पंचवर्गयां विंशोपकाः विंशोपका
त्मकबलमित्यर्थः विंशोन रसदा ६ ४० अल्पबले सति यदुः कनिष्टबलः सत्रिंशा त्रयोदशाल्प

ल.के.टी.

१२ ३० मध्यबलः ततोधिकं पूर्णबलमिति सर्वत्र ज्ञेयं विंशति विंशोपकानां त्रिधा विभाग इति

तत्र उदाहरणं रविः ५ २४ ४२ १२ रविः शत्रोः

अथ ग्रहाणां पंचवर्गीचक्रम्

स्व	मित्र	सम	शत्रु	ग्रहा	ति
३०	२२ ३०	१५	७ ३०	गृह	
३०	१५	१०	५	उच्च	
१५	११ १५	७ ३०	३ ४५	हद्द	
१०	७ ३०	५ ०	२ ३०	द्रेष्काण	
५	३ ४५	२ ३०	१ १५	नवांश	

बुधस्य गृहे कन्यायां स्थितः
अतः शत्रुगृहे सार्द्धसप्त ७
३० गृहे प्राप्ताः नीचं ६ १०
१५ ७ ४८ षड्भान्यूनम
तो यथास्थितमेव अस्य ल
ब्धाः १५ ७ ४८ नवभिर्भ
क्ताः जातं उच्चबलं १ ४२
कन्यायां भौमस्य मित्रस्य

र	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
चं	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
मं	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
बु	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
गु	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
शु	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
श	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

ल॰ के॰ री॰

ग्रहेस्ति अतोजातं हद्दाबलं ७।३० बुधस्य त्रेष्काणेऽस्ति अतस्त्रेष्काणबलं २।३० अत्र रविः स्व
नवमांशेस्ति अतोजातं नवमांशबलं ५।२० पंचवर्गजयुतिः २४।१२ अस्याः पादेजातं
रवेः पंचवर्गजबले विंशोपकाः ६ । ३ एवं जातानि प्रत्येकं पंचवर्गजबलानि तद्युतिः ॥ विंशो
पकाश्च लिख्यंते ॥ ॥ इति पंचवर्गबलाध्यायः ॥ ॥ अथ वर्षेशज्ञानार्थं पंचाधिकारिणां
विवक्षुस्तत्रादौ त्रैराशिकेशानाह ॥ ॥ सूर्य्यज्यौ सितशनी लग्नराहि विद्रौ शुक्रार्क्यौ चक्रम

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी	राशयः
सू	शु	श	बु	गु	चं	बु	मं	श	मं	गु	चं	दिनेश्वराः
गु	चं	बु	मं	सू	शु	श	शु	श	मं	गु	चं	रात्रीश्वराः

न्मेषाद्येषु चतुष्पु लायन तनो चाह त्रिशो। स्वामिनो व्यस्तोतोस्तिल श्चतुष्पिसरा चापाच्चतुष्पे श्वराः मंदारज्ञा निशाकराः क्रमगतास्त्रैराशिकाधीश्वराः १६ मेषा

ल॰के॰टी॰

द्विचतुर्थुराशिषु वर्त्तमानायां हायनतनौ वर्षप्रवेशलग्ने एतावहर्निशोः दिनरात्र्योः स्वामिनो
स्तः तद्यथा वर्षप्रवेशसमये मेषलग्ने दिवारात्रौ क्रमात् सूर्यज्यौ शराशिकेश्वरौ ज्ञेयौ वृषे शुक्र
चंद्रौ मिथुने शनिबुधौ कर्के शुक्रभौमौ दिवारात्रौ शराशिकेशगाविति सर्वत्र संबध्यनीयं तौ
हरितः सिंहात् चतुर्थुराशिषु विपरीतौ ज्ञेयौ तद्यथा सिंहलग्ने वर्षप्रवेशे दिवारात्र्योः क्रमा
द्गुरुरवी रत्तः कन्यायां चंद्रशुक्रौ तुलायां बुधशनी वृश्चिके बुधशुक्रौ अथ चापात् ध
नुषाश्चतुर्थुराशिषु लग्नेषु सदा दिवारात्रावपि क्रमाच्छनि भौमगुरुचंद्राः शराशिकाधीश्वराः भ
वंति अथ पंचाधिकारिमध्ये शेराशिकमुक्तेदानीं अधिकारिचतुष्टये वर्षेशनिर्णयं चाह नि
रयजन्मर्क्षपति दिवार्कभपतिर्जन्माब्दलग्नं थिहेशराश्शराशिनाथपो शंपंच रवसहावीर्याधिकोल
ग्नदृक् सोब्दपोल्पबलोपि दृष्टिसहितः साम्यबले योधिदृक् दृक्साम्ये न्हिरविनिशिगुरुः सनोना

९६

चैत्रिरात्रीश्वराः ७ निशिरात्रौ वर्षप्रवेशे अर्क्षपतिः अर्क्षश्चंद्रो यद्राशौ गतस्पति
रधिकारी दिवावर्षप्रवेशे अर्कभपतिः अर्कः सूर्यो यद्राशौ गतस्पतिरधिकारी जन्माब्द
लग्नेशथिहेशाः जन्मलग्नं वर्षलग्नं मुथाखामी त्रैराशिकपो त्रेषां पंचस्वसद्मं पंचाधिकारि
ग्रहाणां मध्ये यो वीर्याधिकः पंचवर्गीबलाधिकः लग्नं दृष्टुकलग्नं पश्यति यः स यतः अत्र वर्षे अ
ब्देशाः वर्षेशो भवति अल्पबलोऽपि न्यूनबलोऽपि दृष्टिसहितः दृष्टियुक्तः अवेशोऽइति न्यूनब
लोऽपि दृष्टिसहित एव वर्षेशो भवति नान्यथेत्यर्थः साम्यबले द्वयोः समानबले यः
अधिकदृष्टियुक्तः स एव वर्षेशः दृक्साम्ये दृष्टिसाम्ये आह दिवावर्षप्रवेशे रविर्वर्षेशः
निशिवर्षप्रवेशे चंद्रो वर्षेशः असावेव असकौ रविश्चंद्रो वा पंचाधिकारमध्ये नो चेत्तदा
त्रिराशीशो वर्षेशो ज्ञेयः उदाहरणं जन्मलग्नस्वामी शुक्रः मुथेशः शुक्रः वर्षलग्नस्वा

९६

ल·के·टी·

द्विवास्सूर्याक्रांतरात्रौत्रोबुधः अत्रबुधस्यबलाधिक्याद्
मीशुक्रः त्रैराशिकेत्रोबुधः अथशुभाशुभमुथहामाह यत्रजन्म
ष्याधिक्याद्बुधस्यवर्षेशत्वइस्यवेशविचारः नबलान्वितनचशुभेनेष्टान्विताडुष्टद
ननोस्तएवमुथहायाःस्वनाहष्ट्यायुतास्वामीष्टेनबलान्वितनषट्सुखीयस्तिगाडुष्टोन्य
सद्भावेशुभेतस्वभाचरतिडुष्टाडुष्टहलद्भावत्ययानोकिंचिनेषट्सुखींयस्तिमित्रेणनथाचबला
गाभाविहल १८ जन्मतनोः जन्मलग्नस्ययुताधानथास्वामीष्टेनस्वामिमित्रेणनथाचबल
न्वितेनबलयुक्तेनशुभेनस्शुभयहेणहष्टायुताबाइष्टाइष्टफलदा अथमुथास्वामिशत्रुणा
पापयहेणचयुताहष्टाबातदाडुष्टप्रदाअनिष्टफलदा शुभामुथासद्भावे तनुधनसह
जपंचमनवमदशमैकादशस्थानेस्थिताशुभफलदा डुष्टाअशुभामुथाअसतिडु
ष्टभावेचतुर्थषष्ठसप्तमाष्टद्वादशभावेडुष्टहलतडुष्टफलदा पूर्वोक्तडुष्टामुथाशुभभाव

७

पूर्वोक्ताशुभावामुंथा दुष्टभावे इति वैपरीत्ये सति फलं न किंचित् शुभाशुभफलं नास्ति सु
न ७ षट् ६ सुख ४ व्य १२ मृति ८ गा इति लग्नादि नतस्थानगामुंथा दुष्टा अन्यथा प्रथम १
द्वितीय २ तृतीय ३ पंचम ५ नवम ९ दशमे १० ११ कादश ११ स्थानगा भावक्रमेणावमानेन शु
भाशुभफलदात्री पूर्वोक्तालेन्या । इति शुभाशुभमुंथाविचारः अथ यत्शुभमध्यमाधमफ
लादेशानिर्णयमाह स्वक्षोच्चेष्टभवर्गगः शुभसुहृद्दृष्टो जयी योऽस्तु दृष्ट्वधीर्व्ययक्षायगतो व
भान्मुथानीलो सौम्ये ग्रहः पूर्णदृक् स द्वर्गोन्नमहर्षे गोइ गुणवान्मध्योधमोऽष्टास्यषष्ठ
नीचेऽस्तोऽरिभगो जितोर्क खलयुग्वक्रीदृशाघेभृत् १९ योग्रहः स्वक्षोच्चेष्टभवर्गगः स्वरा
द्गोरवोच्चो मित्रस्य द्वादशवर्गस्थितः शुभसुहृद्दृष्टः शुभैर्मित्रैर्वा दृष्टः जयीति ग्रहः यो
परस्परयुद्धे यः उदक्स्थः सजयी इति तस्य संज्ञा वर्षलग्नात् धीव्ययक्षायगतः पंचमलग्नी

७

ल॰के॰टी॰

यनवमैकादशस्थानगः सौम्यैः शुभग्रहैः मुथशिलीमुथशिलमस्यास्तीति मुथशिली सौम्यैः ग्रहैः मुथशिलवानित्यर्थः पूर्णरक्तः पूर्णा संपूर्णा रक्तदृष्टिर्यस्य स तथोक्तः प्रसन्नदृष्टिरित्यर्थः वर्गोत्तमस्वर्गः योराशिस्तन्नवांशो वर्गोत्तमः हर्षस्थानानि पूर्वोक्तानि तत्र स्थितः ऐते भेदैर्बली ग्रहो ज्ञेयः तस्य फलमाह सन्निति सन्शुभफलदः अर्द्धगुणस्थितः उक्तभेदमध्ये अर्द्धभेदाः प्राप्ताः तदा मध्यः मध्यफलदः अष्टांशषट् नीचेवर्गबलयात् उक्तभेदमध्ये अर्द्धभेदाः प्राप्ताः तदा मध्यः मध्यफलदः

त्र अष्टद्वादशषड्स्यतमस्थः अल्पो अबिंबः अरिभगः शत्रुराशिस्थः जितः युद्धपराजितः अर्कयुक्त अस्तंगतः खलयुक्त खलैः पापैर्युक्तः वक्री वक्रंप्राप्तः एतादृशो ग्रहः अधमः हीनबलः दुर्बलोग्रहः षष्ठदशांतर्दशादिषु असन् अशुभफलदः १९ अथ सूतमान्याह चापोच्चाधिकं विधुतोन्यथा निशि तनुः क्षेपो भवेत् सुएयकं तद्धत्कर्म बुधः कुजादथ गुरोः पुण्यं यदा सम्यक्

१८

तत् । विद्याख्यं विधुरर्केणार्क इनजाद्भ्रात्र्यं च पित्रा लयं मातुः सद्म भृगुर्विधोरथ भवेत्क्षेमाख्यमा
रो गुरोः २० अर्कः सूर्यो विधोश्चंद्रात् द्विवावर्षभवे शेसप्ति शोध्यः अन्यथा निशि राचौ वर्षप्रव
र्तौ विपरीतं चंद्रः सूर्याच्छोध्य इति सर्वत्र ज्ञेयं ततस्तु क्षेप्यो लग्नं योज्यं पुण्यकं पुण्यसह
मं भवेत् तद्वत्तथैव कुजात् बुधः शोध्यः कर्मसहमं भवति गुरोः पुण्यं शोध्यं यशः सद्म यशःसह
मं अर्कात् विधुः शोध्यः विद्याख्यं सहमं भवति इनजाच्छने अर्कः शोध्यः राज्यं राज्यसहमं त
द्वत् पित्रा लयं पितृसहमं भवति विधोः भृगुः शोध्यः मातृसहमं भवति गुरोः भौमः शोध्यः
क्षेमसहमं भवति २० देवेज्यात्कुसुतो भवेत्सकलटकं चंद्राद्बुधो बंधकस्या छिद्रसद्म त्वानिः कु
जाद्थ भवेच्छौर्यं कुजः पुण्यतः पुत्राख्यं द्युनिशो विधुः सुरगुरोः श्वाचाराख्यमार्कि गुरो लग्न
च्छीतगुरवमा घसहमं स्वेच्छात्खभं द्व्यकं २१ देवेज्यो गुरुः कुसुतः शोध्यः कलटकसहमं

१८

ल॰के॰री

भवति चंद्राद्बुधः शोध्यः बंधकसहमं भवति कुजाज्जीमात् शनिः शोध्यः हिदसह्म
पुण्यतः पुण्यसहमात् कुजः शोध्यः शौर्यपराक्रमसहमं भवति युनिशादिवाराशौव
र्षप्रवेशासुरगुरुः विधुश्चंद्रः शोध्यः पुत्रास्व्यसहम एवमग्रेपि द्वे यं द्विशरोशैवर्षमेव
शोशोध्यशोधकयोर्विपर्ययो नास्ति पाठक्रमे एवं ज्ञेयं गुरोः आर्किः शनिः शोध्यः धात्रा
स्वयंसहम लमात् चीलगुरुश्चंद्रः शोध्यः माहसहमं स्वसंधनभवनं स्वेच्छागृहमभवन
सकाशाल शोध्यं इष्यकं भवति २१ मत्स्यारख्यसम्मतेः शनेः शितरश्मि श्योहालमाकीरग
गोल्यापारे कुजतो बुधोथ भृगुतोवः पारदार्यं भवेत् अवंशानपुत भपेनसहमेवात्रेशाह
स्थान्नितम द्विवीसह माध्यिपस्य किलिसेन तस्ची पलाभप्रदं २२ सम्मतेः अष्टमभावपु
नालतानः शितरश्मिश्चंद्रः शोध्यः मृतिसहमं भवति अत्रलग्नभंगोऽयं अष्टमभावपु

१६

त्वा भृगोः शुक्रात् आर्कि: वाविः शोध्यः उद्वाहविवाहसहमं कुजतः भौमात् बु
धः शोध्यः व्यापारसहमं अथ भृगुसुतात् शुक्रात् अर्कः सूर्यः सूर्यः शोध्यः परदार्यं
परस्त्रीसहमं भवेत् अथ सहमानां सामान्यतः शुभाशुभफलं चाह अर्वे वैत्नै नेति सह
मं अव्दे वेर्षे नेत्रनेयुक्तं भपेनराशिस्वामिना वा युक्तं स्वराशि दृष्ट्यान्वितं स्वस्वामिनो
न्वितं दृष्टं वा सद्भिः शुभैर्ग्रहैर्युक्तं दृष्टं एतादृशं सहमं सहमाधिपस्य सहमस्वामिनः कि
शिमिदशायां स्त्रीयलाभपदं भवति लघुथा पुण्यसहमं चैत्राद्दशायां पुण्यवृद्धिदं द्र
व्यसहमं स्वराशि दशायां धनवृद्धिदमित्यादि उदाहरणं चन्द्रात् १ ७ २२ ४५ सूर्ये
५ २४ ४२ १२ शोधिते शेषं १ १२ ५० ३३ लग्नं ६ २० १ ६ युतं जातं पुण्यसहमं ७ ५
५१ ४२ एवं ज्ञातानि सर्वाणि सहमानि लिख्यते २२ अथ दशानयनार्थं हद्दाचारा

पुण	कूर्म	यक्रा	श्री	रा उग्र	पि	मा	म	बुंध	ह्रि	प	पु	न्ना	मां घ	ड	स्व	उत्त	व्या पा	पाय	घ क
२	१०	२२	११	१०	२०	७	९	१	८	८	८	११	०	११	२०	२७	०	८	९
५२	२८	५६	१०	३६	३६	२०	२३	२२	२९	४८	२०	३६	१५	३५	२५	३५	१९	१	२३
५५	५८	३३	३६	३८	३८	२५	३३	५७	५८	५८	२४	५८	३२	५३	२८	३७	५४	३६	३३

ह भंस कोदयरवो कसांहतशैलघाः प्राकृस्पुस्तद्र्यौर्धतः पायोनैकदृसेष्टथकूस्वपुति ह
हर्वघुनिघ्नादशेगः साम्ये शैबलिनोर्द्वयोः समबलेपूर्वस्य तु लेद्र्योतं चास्वैक्य विहह रागा
महताअंतर्द्वग्रास्तुः क्रमात् २२ उदयरवो कुस्मलभयलाएगे भंराशिं स्य तनायद्रहहचा
लवाः अल्पभागास्तअयेरव्याप्याः एवमयपिहायं एवंदृक्कर्मोलरव्यः ततः तदनंतरं

३८

ल॰ केटी॰
२०

उर्ध्वोर्ध्वतः पास्यादितिवदंति तदल्पमतत्वान्नांगीकृतं एतेपास्यांकाः पृथक्स्थाप्याः
स्वयुतिहृद्वर्षघ्नुनिघ्नाइति स्वपात्योत्त्रारतेषांयुतियोगस्तेन हृद्भक्ता वर्षघ्नुसौरवर्षाब्द
दसाः ३६० अथवासावनवर्षदिवसाः ३६५ १५ ३१ ३० ततोलब्धेन गुणकेन गुणिताः
पृथक्स्थ स्वस्वपात्यांशाः दिनाद्याः स्वदशाः स्युः साम्येसतिद्वयोः समबले पंचवर्गीब
लसाम्येद्वयोः अंशोभोगैः साम्येसमत्वेसतिबलिनः पंचवर्गीबलाधिकस्यपूर्वाप्रथमादशा
स्यात् बलसाम्ये अल्पभुक्तैः न्यूनगतेः पूर्वादशाज्ञेया सौरदशायां वर्षप्रवेशसमये प
वप्रथमं सौरदशायां वेशः तदधो वर्षप्रवेशकालीनसूर्यो लेख्यः प्रथमदशादिनादि प्र
थमदशाकालीनस्य [illegible]ष्टसूर्ये योज्यं तद्यथा सूर्यस्य अंशस्थाने अंशाः योज्याः कला
स्थाने घटिकाः योज्याः विकलास्थाने पलानि योज्यानि विकलाः षष्ट्या भक्ताः लब्धं

२०

ल॰के॰टी॰

कलासु योज्यं कलाः षष्टिभक्ताः लब्धमंशेषु योज्यं अंशाः त्रिंशद्भक्ताः लब्धं राशिषु संयोज्यं राशयो द्वादशाधिकास्तदा द्वादशभिस्तष्टाः शेषं राशयः तादृशोऽर्कः सूर्ये द्वितीयदशा प्रवेशः एवं द्वितीयदशाप्रवेशकालीनसूर्ये तृतीयदशा दिनानि संयोज्य तादृशो सूर्ये तत् प्रवेशः एवमग्रेपि एवं योजने वर्षप्रवेशकालीनसूर्ये तुल्यः अंतिमसूर्यो भवति तत् यदशाप्रवेशः एवमग्रेपि एवं योजने वर्षप्रवेशकालीनसूर्ये तुल्यः अंतिमसूर्यो भवति तत् दशोत्तरदशाक्रमः शुद्धोऽन्यथा अशुद्ध इति अथ सावनदशायां वर्षप्रवेशसमये सा वासरदशाक्रमः शुद्धोऽन्यथा अशुद्ध इति नप्रथमदशाप्रवेशः ततो वर्षप्रवेशवारादौ द्वितीयदशा दिनानि तस्मिन्मासि वारादौ दत्ते यदशाप्रवेशः एवमग्रेपि एवं योजनेऽग्रिमवर्षप्रवेशवारादिकमायाति तदा दशाप्रवेशः शु द्धः अन्यथा अशुद्धः अथांतर्दशासाधनमाह नैशाद्इति स्वेष्टविहृदशादिनहताः स्व पास्वांशास्तेषामैक्येन योगेन हृत्वा भक्तानि यानि दशादिनानि तेभ्यो यल्लब्धं तेन हताः पु

२१

ल्पिताः पृथक्रूपासांशाः अंतर्दशाः दिनाद्याः स्युः एतदुक्तं भवति यस्य दशामानं
पासांशायोगेन भक्तं यदत्र लब्धं तेन पृथक्रूपात्यांशो गुणिता जाताः तस्य दशायां अंतर्दशा
दिनोनि भवंति अत्र यस्य दशामध्ये अंतर्दशा क्रियते तत्र तस्यैवांतर्दशा प्रथमा तते
स्तदग्रिमक्रमेण ज्ञेयं उदाहरणं शुक्रः सर्वापेक्षया न्यूनांशः अतः प्रथमं शु
क्रः स्थापितः २ ४३ ३९ ततो भौमः ४ ४५ ४६ ततो गुरुः ४ ५७ ० ततश्चंद्रः ७ ३२ ४५
ततो बुधः ७ ४८ ११ ततो लग्नं २३ १ ९ ततोऽर्कः २८ ४२ १२ ततः शनिः २८ १९ ११ अथ प्र
थमं यथा स्थिताः शुक्रपासांशाः २ ४३ ३९ एते भौमहीनांशाः ४ ४५ ४६ मध्ये शोधिता
जाताः भौमपासांशाः २ २ ७ एवं पूर्वांशाः अग्रिममध्ये शोधिता सर्वेषां यातिपासां
शाः गुरुः ० ११ १४ चंद्राः २ ३५ ४५ बुधः ० १५ २६ लग्नं १५ १२ ५८ सूर्यः १ ४१

२१

के.टी.

अथ सूर्यादीनां ग्रहाणां ह्रस्वगणः

सू	मं	गु	चं	बु	ल	स	त्रा
२ १३ ११	४ ५८ ५८	४ ५ ०	० ३२ ४५	० २८ ११	२३ १ १	२४ १४ २४	२८ १९ ११

अथ ग्रहाणां पास्यांशाः लिख्यन्ते॥

सू	मं	गु	चं	बु	ल	स	रा	या
२ १३ १२	२ ३ ०	० ११ २४	२ ३५ २५	१६ १६ २६	१५ १२ ५२	० १० ७	३६ ३६ २८	२८ २९ ११

अथ ग्रहाणां सौरमहद्गणचक्रम्

शु	मौ	गु	चं	बु	ल	स	त्रा	योगः
३४ ४० २८	२५ ५२ २१	२ २२ ४८	३२ ५५ ५४	२ १६ २२	१४ १५ १७	२१ २४ ३२	४५ ५८ ७	३६० ० ०
५ २४ ४२ २२								

शेषानि: ३ ३९ ५९ एतेषां संज्ञा योगः २८ २९ ११ अनेन वर्षमिति: ३६० भागा जातेषु

२२

भ्याकि: १२ ४२ ४३ अनेनशुक्रपासांत्रा: २ ४३ ३९ गुणिताजातानिशुक्रदत्रादिनानि ३४
४० १८ अथवापासांशयोगेन २८ १९ ११ वर्षमिति: ३६५ १५ ३१ ३० भक्ताजातोगुणक: १२
५३ ५१ अनेनशुक्रस्यपास्यांत्रा: २ ४३ ३९ गुणितानिजातानिशुक्रदत्रा:१दनानि २५ १०
४० एवंसर्वेषांग्रहानांत्रा: सौरसावनदत्रादिनाद्या: लिख्यंते अथांतदृत्रोदाहरणम् शु
क्रदत्रायां ३४ ४० १८ पासांत्रायोगेन २८ १९ ११ भक्ताजातोगुणक: १ १३ २७ अनेनेशु
क्रस्यपास्यांत्रा:गुणिता: जाता: शुक्रमह दत्रामध्येशुक्रांतदृशा ३ २० ३० अथशुक्रस्यस
वनदत्रा ३५ १० ४० पासांत्रायोगेन २८ १९ ११ भक्ताजातोगुणक: १ १४ ३१ अनेनगुणि
ता: शुक्रस्यपास्यांशाजातोशुक्रदत्रामध्येसावनोतदृत्रा लिख्यंते इति अंतदृत्राक्रम: अ
थदत्रायादृदत्रामध्येकेषामंतदृत्राशुभाद्दसाह जीवार्केबुधदत्रयमिनेदु गवेनेष्टा:
सितेदुकीदेत्ययमाबुधत्रयमिनोदंतदृत्रोत्रा: शुभा: इत्येकेन्भयुत्रजन्मराशिलग्नतुल्यरवौ

२२

ल॰के॰टी॰

२२

खेचरास्तन्वाद्यान्प्रतिमासमुत्क्रमल्लवेद्भावांशाद्योश्चिंतयेत् २४ इनात्सूर्यमारभ्य
तद्दशास्थाप्याः शुभाः तद्यथा जीवारेंदवरविदशायां भौमचंद्रेज्यौ अंतर्दशेशाः शुभाः
इनेंदुभौमदशायां सूर्यचंद्रावंतर्दशेशौ भृगविनेज्या बुधदशायां शुक्रसूर्यगुरवोंतर्द
शेशाः सितेन्दुजौ गुरुबुधदशायां शुक्रचंद्रसूर्या अंतर्दशेशाः सौम्ययमौ शुक्र
दशायां बुधगुरुशनैश्चराः बुधत्रयं बुधगुरुशुक्राः शनिदशायां अंतर्दशेशाः शु
भा इति सर्वत्र संबंधः अनुक्ता अशुभा इत्यर्थः अथ मासप्रवेशज्ञानमाह एकैक
राशिभुक्ते जन्मकालीनसूर्येण तुल्ये रवौ सूर्ये द्वितीयमासप्रवेशः स्यादिति प्रतिमासं
खेचरायत्तान्तन्वाद्याल्लग्नादिभान्तीनुद्वादशभावांश्च हस्तत्वादुत्क्रमल्लवेद्भावांशा
पौ उत्क्रमं लग्नं तत्रयाल्लवान्नवमांशास्तस्येइदृस्वामी भावांशापौ भावास्तन्वाद्याः तेत्र

२२

45

न॰के॰टी॰

येअंशाः नवांशाः तत्स्वामी एतेोऽभ्यो चिंतयेत् एतदुक्तं भवति प्रथममासप्रवेशा
त्तु वर्षप्रवेशासम एव ज्ञातः तत्र जन्मार्कतुल्य एवार्कोऽस्ति जन्मदेशांतरचरसंस्कारस्य द
त्तत्वात् ताः मासप्रवेशकाले स्थूलघटिका भवंति ततः सूक्ष्मघटिकानयनप्रकारः
अल्पेऽदेशांतरभुजफलचरदेशांतरसंस्कारः कार्यः सोऽल्पः सूक्ष्मो भवति तत्रो
दोऽदेशांतरमाह यस्मिन्दिने यस्मिन्समये स्थूलमानेन मासप्रवेशो जातः तस्मिन्
दिने तावति समये मध्यमो रविः कार्यः सअयनांशायुक्तः कार्यः तस्य भागाः कार्याः
षड्भिर्भाज्याः फलं घटीपलात्मकं ग्राह्यं तदनंतरं मासप्रवेशकालीनसायनमध्यमसू
र्यस्य यावतो राशिस्तावत्संख्याकानां मेषादीनां पलात्मकानां उदयानां योगः कार्यः
तदनंतरं सूर्यस्य भुक्तभोगैः सूर्यस्य भोग्यराशेरुदयो गुण्याः त्रिंशद्भक्तं फलं स्वोदय

२४

युक्तंकार्यंषष्ट्याभक्तेफलाद्यंस्यात् तस्मिन् पूर्वघटिकाद्योध्यन्तोऽपंधनसंज्ञकंउदयांतरंभ
वति इतिउदयांतरधनंसंज्ञकं अथ पघटिकासु ऋणकार्यं ऋणं चेत्तदा धनकार्यं अथभु
जफलमाह सूर्ये एकराशौ यो स्थिते तुल्ये सूर्ये यद्दिने यस्मिन् समये तत्रतत्र द्वितीयमासप्र
वेशो भवति एवं द्वितीयमासप्रवेशार्के यस्मिन् राशौ गयोज्ञे तत्तुल्ये ऽर्के तृतीयमासप्रवेशो
भवति एवमग्रेपिबोध्यं अथपंचांगात्मासप्रवेशघटिकाद्यानयनं एकैकराशिभो
गेनशातेमासप्रवेशार्कः अस्यासन्नपंचांगारिथत पृष्ठावस्थितमर्कतदवधिस्थार्कमास
प्रवेशार्कयोरंतरंकार्यंतस्यकलाः कार्याः अवधिस्थार्कगत्याभाज्यः फलंदिनाद्यं विस्थवार
घटीपलाद्यंसंयोज्यंतत्फलं अवधिवारादौ हीनयुक्तकार्यंतद्यथा मासप्रवेशकालीनार्क
नः अवधिस्थार्कोऽधिकश्चेत्तदावधिस्थवारादौ हीनंकार्यं न्यूनेयुक्तंकार्यं अवधिस्थवा

२४

ल. के. टी.

शराविसत्रसंस्काररहितो वारघटीपलात्मको ऽल्पो ग्राह्यः स यथा यस्मात्ग्रंथात्पंचांग
स्थितसूर्यः साधितः तस्मात्ग्रंथात् अल्पः साध्यः अवधिस्थघटिकानयाद्यो कुनः
यज्ञामस्थपंचांगतज्ञामस्थमासप्रवेशकालीनमध्यमसूर्यात् मंदफलं साध्यं तस्यकालः
कार्यः षष्ट्याधिकशतत्रये ३६० भाज्याः फलघटिकाद्यं भुजफलसंज्ञकं भवति मंदफल
धनं चेद्भुजफलं धनं ऋणं चेदृणं इदं भुजफलं धनं चेदुदयात् तत्संस्कृत अल्पघटिको
सुकृणं कार्यं ऋणं चेद्धनं कार्यं अपरसंस्कारमाह मासप्रवेशकालीनमध्यमसूर्यात्
फलमागतं तत्मध्यमसूर्ये यथागतं धनं यदिदं तस्मात्पलात्मकचरमानीय षष्ट्या भक्तं
घटिकाद्यं भवति तत्घटीपलात्मकचरमुदयात् तत् भुजफलसंस्कृतघटिकादि धनं चेत्तद्
ऋणं कार्यं ऋणं चेद्धनं कार्यं अथ देशांतरसंस्कारमाह यावंति देशांतरयोजनानि

२५

भवंति तानि चतुर्थांशोनितानि कार्याणि ततः पलाभिकानि भवंति तत्पलात्मकदेशां
तरधनं चेत् उदयांतरभुजफलचरसंस्कृत घटिकासु ऋणं चेद्धनं कार्यं एतत्फलचतुष्ट
यसंस्कारे कृते अर्कस्पष्टघटिकाः स्पष्टाः भवंति परंतु एतत्संस्कारचतुष्टयमध्ये जन्मभूमौ
लीनस्य यावद्भिः संस्कारैः संस्कृतो भवति तावद्भिः संस्कारैः रव्युदयः संस्कार्यः अ
वधिस्थार्कमासप्रवेशार्कयोरंतरात् पूर्वयद्वाराद्यं भोगतंतत्स्पष्टार्कउदयउन्नतहीनयु
क् कार्यं ताः मासप्रवेशस्पष्टघटिकाः भवंति तस्मिन् काले स्पष्टग्रहाः नवांशा
भावाश्च पंचवर्गिकाश्च कार्याः ततो मासेश्वरनिर्णयः सयथा मासलग्नेशः जन्मल
ग्नेशः मुंथेशः त्रिराशीशः दिनरात्रीशः वर्षलग्नेशः एषांमध्ये यः पंचवर्गी बलाधिकः
मासलग्नं पश्यति स मासेश्वरो ज्ञेयः बलादिसाम्ये तु वर्षेशः विचारणीयः उदाहरणं

२५

ल॰के॰टी॰

रविः ५ २४ ४२ १२ एकरात्रियुक्तः जातोमासप्रवेशार्कः ६ २४ ४२ १२ कार्तिककृष्ण
२ बुधे अवधिस्थोर्कः ६ २७ ४१८ गतिः ६० ३० अनयोरंतरं ० १ ३७ ५४ अस्यकलाः
६७ ५४ गतिकलाभिः ६० ३० भक्ताः सवर्णितो भाज्यभाजको ५८७४ भाजकः ३६३० भा
जकेन हृते भाज्यफलं दिनघटीपलात्मकं १ ३७ ५ इदं अवधिस्थार्कवारघटीपला
त्मके ४ ३४ ४४ युतं ६ १२ ४९ कुतः एकरात्रिरुवितः अवधिस्थसूर्यस्येन्यूनत्वात् ए
वं जातः कार्तिककृष्णपंचम्यां ५ भृगौ मासप्रवेशः स्थूल घटिकाः १२ ४९ अतः सूक्ष्मका
लसाधनं कार्तिककृष्णपंचम्यां भृगौ मध्यमोर्कः ६ २६ ५८ आभिर्घटिकाभिः १२ ४९ चा
लितः जातो मासप्रवेशकालीन मध्यमोर्कः ६ २६ ३५ अयनांशाः १८ २९ युक्तः ७ १४ ६४
१५ अस्यभागाः २२४ ३४ ३५ षड्भक्ताः लब्धं घटिकापलात्मकं ३७ २५ सायनसूर्यस्प

२६

भुक्तराशयः स स ७ तुल्यमेषादारभ्यपलात्मकउदयानांयोगः २१२८ सूर्यस्यभुक्तभोगेः १४
३४ ३५ भोग्यप्रश्चिकोदयो ३६७ गुणितः ५०५८ त्रिंशाङ्कहृतःलब्धं १६८ उदययोगेन २१३८
युक्तं २३०६ षष्ठिभक्तंलब्धंघटिकाः ३८ २६ एतन्मध्ये पूर्वघटिकाः ३७ २५ शोधितान्शेषंध
नसंज्ञकउदयांतरं घटिकाद्यानि थो विपरीत भुक्तत्वात्जातं ऋणं १ १ इदं अब्दपे ४ ३५ ४४
ऊनं जातं उदयांतरसंस्कृतोब्दपः ४ ३४ ४३ अथ भुजफलसाधनमाह मासप्रवेशका
लीनमध्यमसूर्यात् ६ २६ २६ ३५ मंदफलं ऋणं १ ४२ ४२ अस्य कलाः १०२ ४२ भाजकेन
३६० भक्ताः लब्धाः घटिकाद्यं भुजफलं ऋणं ० १७ विपरीतं इदं भुक्तत्वात् जातं धनं ० १७ इदं
उदयांतरसंस्कृताब्दपे ४ ३४ ४३ युतं जातं उदयांतरभुजफलसंस्कृतोब्दपः ४ ३५ ४० अथ
चरसंस्कारमाह मंदफलसंस्कृतोर्कः ६ २४ ३१ १६ एभ्यश्चरं धनं पलात्मकं ८० षष्ठि ६०

२६

ल॰के॰टी॰

भक्तेजातं घटिकाद्यं ०।१२।० विपरीतमुक्त्वातज्जातं कृत्वा ०।१२।० इदं उदयांतरं भुजफलसंस्कृ
ताब्दये ४।१५।० रहितं जातं उदयांतरं भुजफलचरसंस्कृतोऽब्दपः ४।३।१०।० अथ देशांतरसं
स्कारमाह। देशांतरयोजनानि कृत्वा नि १६ चतुर्थांशो निताञ्जोला नि ४२ एतानि उदयांतरभु
जफलचरसंस्कृतोऽब्दप ४।३।१।० युतानि जातं उदयांतरभुजफलचरदेशांतरसंस्कृतः स्पष्टोऽब्द
पः ४।३३।५२ अवधिस्थार्कमासप्रवेशार्कयोरंतरात् सूर्य साधिकवारादिकमिदं ०।१०।७।१९ एकप
सिसुकरवितः अवधिस्थसूर्यस्य न्यूनत्वात् स्पष्टोऽब्दप ४।१०।१९ युतं जातो मासप्रवेशो सूक्ष्म
कालः ६।१०।५७ एवं जाताः षोडशपंचम्यां भृगौ द्वितीयमासप्रवेशोऽसूक्ष्मघटिकाः ०।१५।७ एवम
वेपिबोध्यं। एकथं थादुभयोः साधनं चेत् क्रियते तदा सूक्ष्मघटिकाः संभवंति अतएवमविचार्य
ग्रंथभेदे सति संस्कारभेदे सति पंचांगोपरि मासप्रवेशानयनं क्रियते तदशुद्धं यस्मात् ग्रंथात्

52

३७

जन्मकालीनसूर्योयावद्भिः संस्कारैः संस्कृतो भवति तावद्भिः संस्कारैः तस्मात् यथा तन्मास
प्रवेशदिवसे सूर्यः साध्यः अनयोः स्वसकाशात् सूक्ष्मघटिकाः भवति अथ दिनप्रवेशाद
च्यते वर्षसमये एव प्रथममासस्य प्रथमदिनप्रवेशः वर्षप्रवेशसूर्ये एकैकांशयोगे
नततुल्येन सूर्यो हि तो यादि दिनानां प्रवेशो ज्ञेयः तत्र वेशकालस्थानं मासप्रवेशकालव
त् ज्ञेयं अत्रापि मासेश्वरवंहने शानिर्णयो ज्ञेयः मासदिनेशयोः फलं वर्षेश्वरवद्वाच्य
अथात्र विचारमाह लग्नेशांशपती मिथस्तनुलवेट्स्वाद्यांशपौ यातयोः सख्यस्नेह
दृग्गी दुहृद्युतिरिलोचरेथो च दृष्टोसन्न देहस्वादिषु सौख्यदो च विपरीतो भावदुष्टप्रदा
वथायाईगुणोप्रकल्प्य किलतो मासेत्र विद्यात्फलं २५ लग्नेशांशपती लग्नेशांतनवां
शस्वामिनौ यो तयोर्मिथः परस्परं सख्यस्नेहदृग्भवति अथवा तनुलवेट्स्वाद्यंशपात

३७

५३

ल॰के॰टी॰

नुर्लग्नस्य लवोनवांशाः तस्य द्रेष्काणस्वामि स्वंधनभावः स आदिर्येषां ते सहजादयः तेषां बंधु
पोनवांशस्वामिनोत यो सख्यः स्नेहदृक्सरव्यमेत्र अथवा स्नेह दृक् स्नेहदृष्टिः अथ द्रेष्कु
हद् युतिः चंद्रदृष्टियोगः अथवा लोपतौ उच्चस्थो अथवा दृग्गो शुभैः ग्रहैः दृस्यो दृष्टो दृष्टोन
थाद्रे तिपाठे दृस्योउदितो न हदेहस्वादिषु देहशरीरं स्वंधनं आदि शब्देन सहजादि पारय
हः शरीरधनादिषु सौख्यदो सुखप्रदो भवतः विपरीतो परस्पर वैरि लोनीचस्थोपापदृ
ष्टो अस्तंगतो न स्याभाव लनिप्रदो भावनाशकरो भवतः अर्द्धेति अशुभदृष्टो पापदृष्टो शुभा
शुभस्थानगो चतुरार्द्धफलो अर्द्धफलो भवतः मासं शुभं विद्यात् जानीयात् अथ मासान्य
तावर्षे शुभाशुभनिर्णयमाह यद्वर्षेति बलो व्द्याब्दतनुपः रवेदाश्च शास्ते थि हानुहर्षे शुभं
मन्यथानशुभदं मिश्रे एमिश्रं वदेत् एतद्भावफलादि विस्तनफलं स्यात्ताजि कोक्तचयत्वे

२८

ता नां स्वदशासु तद्बलवशादेवं फलं वार्षिकं ॥ २६ ॥ यद्वर्षेति ॥ यद्वर्षे यस्मिन्वर्षे अब्दपो वर्षस्वा
मी अतिबलः पंचवर्गीमध्ये पूर्णबलः तथा अब्दतनुपः वर्षलग्नस्वामी पूर्णबलः खेटा ग्रहा स्वे
टाः ग्रहाः अतिबलिनः इत्थशालमुथाशालस्था षष्ठाष्टम ८ व्यय १२ सप्तम ७ स्थानातिरिक्तस्थानगताः तदा त
द्वर्षं शुभं शुभफलदं ॥ अन्यथा वर्षेशवर्षलग्नेशग्रहाः निर्बलाः मुथा दुष्टस्थानगता तदा त
द्वर्षं न शुभदं अशुभमित्यर्थः ॥ मिश्रे याशुभाशुभा मिश्रितं न तद्यथा ॥ अब्देशवर्षलग्नेश
मुथाग्रहाः एतेषां मध्ये यः कश्चन पूर्णबलः कश्चन हीनबलः तदा मिश्रं शुभाशुभं मिश्रफ
लं वदेत् ॥ एतद्वर्षेशफलं ॥ भावफलान्यह भावमुथासहमफलानि विस्तरेण फलं विशेषफलं त
ताजिकोक्तं ताजिकशास्त्रोक्तं ज्ञेयं ॥ खेचरा नाथ ताजिके शुभाशुभफलं बलवशात् पूर्णबले पूर्णं
मध्यबले मध्यं हीनबले हीनं स्वस्वदशासु ज्ञेयं ॥ सहमं मुथाफलं तत्स्वामिदशासु ज्ञेयं ॥ अ

२८

ल.के.री.

न्यैः स्वर्क्षमथाविधोर्गविगुलेः २ स्तुंगं च कोणं परेः कन्यायां तिथि १५ दिक् १० शौरेर्निगदितं त
स्योच्चकोणं स्वभं सिंहे कस्य नरवैः २० शानेरपि घटे चापे गुरोर्दिक् लवैः १० मेषके १२ कुसुतस्य
कोणजफलं जूके तु विश्वे १३ कवेः एवं अमुनाप्रकारेण वार्षिकं वर्षसंबंधिफलं निरूपितं नि
लिन्येषः अथालंकारश्लोकमाह इति विप्रवरिष्टकेशवोप्यकरोद्वर्षफलस्य पद्धतिं त्रि
शुनिशिष्यजनप्रबोधिनीमम्लेनत्वांघ्रियुगप्रसादतः २७ विप्रवरिष्टकेशवः विप्रेषु ब्राह्म
णेषु वरिष्ठः श्रेष्ठः केशवदैवज्ञः वर्षफलस्य पद्धतिं मार्गं इति इत्थं पूर्वोक्तप्रकारेण अकरोत् हर
नवान् कस्मात् अम्लेनत्वांघ्रियुगप्रसादतः अम्लतमो दक्षः तस्य त्वाः न सोधनताननं न
कतयास्वामी महादेवः तस्यांघ्रियुगं चरणद्वयं तत्प्रसादतः कीदृशीं त्रिशुं त्रिशिष्यजनप्रबो
धिनीं त्रिवोबाला श्चैतेषां प्रबोधाहानं यथा २७ अथ जन्मकालाद्ध्यानेप्रश्नकाला

देववर्षफलं कार्यं ॥ अत्र विशेषः ॥ यः प्रश्नकालः स एव वर्षप्रवेशसमयकालः ॥ तत्काला
नंतरं भावादि पूर्ववद्देवकार्यं ॥ तत्र मुंथानयनं ॥ स्पष्टा राशयो न प्रश्नलग्नोकलिकाः स्वाक्ष
नं १५० हृताः लब्धा राशयः दिका मुंथा स्फुटा वर्षे भवेदिति ॥ १ ॥ प्रश्नांगपो वर्षविलग्ननाथो
जन्माधिपस्तूर्यपतिः प्रकल्प्यः ॥ प्रश्नोत्थलग्नान्मुथहाधिपः स्यात्त्रैराशिपः पूर्ववदेव
चिंत्यः ॥ २ ॥ अस्यार्थः ॥ प्रश्ने प्रश्नकाले यदंगं लग्नं तत्स्वामी यः स एव वर्षलग्नस्वामी
तूर्यपतिर्वर्षलग्नाच्चतुर्थो यो राशिः तज्जन्मलग्नं तस्य स्वामी जन्मलग्नेशः ॥ अन्यत्सर्वं
पूर्ववत् ॥ ७ ॥ इति श्रीगणकचक्रचूडामणिश्रीदिवाकरदैवज्ञात्मजश्रीविश्वनाथ
दैवज्ञविरचिता श्रीकेशवदैवज्ञकृतवर्षफलपद्धतिटीका समाप्ता ॥ छ ॥

[OrderDescription]
,CREATED=01.10.20 16:50
,TRANSFERRED=2020/10/01 at 16:58:50
,PAGES=57
,TYPE=STD
,NAME=S0003820
,Book Name=M-1556-VARSHPHAL PADHATI TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,